# आदित्य हृदय स्तोत्र

## || ॐ श्री गणेशाय नमः ||

## || विनियोग ||

ॐ अस्य आदित्य हृदयस्तोत्रस्यागस्त्यऋषिर: अनुष्टुपछन्दः आदित्येहृदयभूतो भगवान ब्रह्मा देवता निरस्ताशेषविघ्नतया ब्रह्मविद्यासिद्धौ सर्वत्र जयसिद्धौ च विनियोगः |

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् |

## करन्यास

ॐ रश्मिमते अंगुष्ठाभ्यां नमः । ॐ समुद्यते तर्जनीभ्यां नमः ।
ॐ देवासुरनमस्कृताय मध्यमाभ्यां नमः । ॐ विवस्वते अनामिकाभ्यां नमः ।
ॐ भास्कराय कनिष्ठिकाभ्यां नमः । ॐ भुवनेश्वराय करतलकरपृष्ठाभ्यां नमः ।

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् | रावणं चाग्रतो दृष्टवा युद्धाय समुपस्थितम् || 1
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् | उपागम्याब्रवीद् रामगस्त्यो भगवान् भगवांस्तदा || 2
राम राम महाबाहो शृणु गुह्यं सनातनम् | येन सर्वानरीन् वत्स समरे विजयिष्यसे || 3
आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् | जयावहं जपं नित्यमक्षयं परमं शिवम् || 4
सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् | चिन्ताशोकप्रशमनम् मायुर्वर्धनमुत्तमम् || 5
रश्मिमंतं समुद्यन्तं देवासुरनमस्कृतम् | पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् || 6

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः | एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः || 7
एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः | महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः || 8
पितरो वसवः साध्या अश्विनौ मरुतो मनुः | वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ||9
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् | सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः || 10
हरिदश्वः सहस्रार्चिः सप्तसप्तिमरीचिमान | तिमिरोन्मन्थनः शम्भुस्त्वष्टा मार्ताण्डकोअंशुमान || 11
हिरण्यगर्भः शिशिरः स्तपनो भास्करो रविः | अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशानः || 12

व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः | धनवृष्टिरपाम मित्रो विंध्यवीथीप्लवंगमः || 13
आतपी मंडली मृत्युः पिंगलः सर्वतापनः | कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः || 14
नक्षत्रग्रहताराणामधिपो विश्वभावनः | तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तुते || 15
नमः पूर्वाय गिरये पश्चिमायाद्रये नमः | ज्योतिर्गणानां पतये दिनाधिपतये नमः || 16
जयाय जयभद्राय हर्यश्वाए नमो नमः | नमो नमः सहस्रांशो आदित्याय नमो नमः || 17
नम उग्राय वीराय सारंगाय नमो नमः | नमः पद्मप्रबोधाय प्रचण्डाय नमोस्तुते || 18

ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे | भास्वते सर्वभक्षाय रौद्राय वपुषे नमः || 19
तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने | कृतघ्नघ्नाय देवाय ज्योतिषाम् पतये नमः || 20
तप्तचामीकराभाय हरये विश्वकर्मणे | नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे || 21

नाशयत्येष वै भूतम तमेष सृजति प्रभुः | पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ||
22
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः | एष चैवाग्निहोत्रम च फलं चैवाग्निहोत्रिणाम
|| 23
देवाशच क्रतवश्चैव क्रतुनाम फलमेव च | यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ||
24
एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च | कीर्तयन पुरुषः कश्चिन्नावसीदति राघव ||
25
पूज्यस्वैनमेकाग्रे देवदेवम जगत्पतिम | एतत त्रिगुणितम् जप्त्वा युद्धेषु विजयिष्यति
|| 26
अस्मिन क्षणे महाबाहो रावणम् तवं जहिष्यसि | एवमुक्त्वा ततोऽगस्त्यो जगामस
यथागतम् || 27
एतच्छ्रुत्वा महातेजा नष्टशोकोऽ भवत तदा | धारयामास सुप्रीतो राघवः
प्रयतात्मवान || 28
आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् | त्रिराचम्य शुचिर्भूत्वा धनुरादाय
वीर्यवान || 29
रावणं प्रेक्ष्य हृष्टात्मा जयार्थ समुपागमत | सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ||
30
अथ रविरवदन्निरिक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः | निशिचरपतिसंक्षयं
विदित्वा सुरगणमध्यगतो वचस्त्वरेति || 31

**|| इति श्री आदित्यहृदयं स्तोत्रम सम्पूर्णम ||**

**www.hanumanchalisalyric.com**